1

श्रीगणेशायनमः ॐ अथ हनुमत्पूजाविधिः । अष्टदलकमलं कृत्वा । विमलादि पूर्वतपी
ठपूजां कार्या हनुमतः केशरेषु च पूजा स्यात् लेख्यन्यांस्तदा क्रियान् १ रामभक्तो महाते
जाः कपिराजो महाबलः ॥ द्रोणाद्रिहारको मेरुपीठकांचनकारकः २ दक्षिणाम्भोस्त
रश्चैव सर्वविघ्ननिवारकः ॥ एवंनामानि संपूज्य दलाग्रे पुच्छवानरान् ।३। सुग्रीव
मंगदं नीलं जाम्बवन्तं नलं तथा ॥ सुखेशं द्विविदं मैन्दं पूजयेद्दिक्पतीन् य
॥१॥ इन्द्रो वन्हिः पितृपतिर्नैरृतो वरुणो मरुत् ॥ कुबेर ईशपतयः पूर्वादीनां दिशां ॥१॥
क्रमात् ॥ एवंसिद्धे मनोमंत्री स्वपरेषं प्रसाधयेत् ह्रौं ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं
हनुमते नमः ॥ तत्रादौ संकल्पः ॐ विष्णुर्विष्णुर्विष्णुः श्रीमदि अद्येति नमः श्रीम
रामाय पुरुषोत्तमाय अद्य ब्रह्मणो द्वितीयप्रहरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्व
तमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भारतखण्डे

मानस्वत्ना ह्रौं बीजं ह्स्फ्रें शक्तिः मनोवांछितसिद्ध्यर्थे जपे विनियोगः श्रीरा
मचन्द्र ऋषये नमः शिरसि जगती छन्दसे नमः मुखे हनुमान् देवतायै
नमः हृदये ह्रौं बीजाय नमः गुह्ये ह्स्फ्रें शक्तये नमः पादयोः मनोवांछित
सिद्ध्यर्थे जपे विनियोगः सर्वांगे ह्रां अंगुष्ठाभ्यां नमः ह्स्फ्रें तर्जनीभ्यां
नमः ह्स्रौं मध्यमाभ्यां नमः ह्स्फ्रें अनामिकाभ्यां नमः ह्स्फ्रें कनिष्ठि
काभ्यां नमः ह्स्रौं करतलकरपृष्ठाभ्यां नमः ह्रौं हृदयाय नमः ह्स्फ्रें शि
रसे स्वाहा ह्स्फ्रें शिखायै वषट् ह्रौं कवचाय हुं ह्स्फ्रें नेत्रत्रयाय
वौषट् ह्स्रौं अस्त्राय फट् अथ वर्णन्यासः ह्रौं नमः मूर्ध्नि ह्स्फ्रें नमः
ललाटे ह्स्फ्रें नमः नेत्रयोः ह्स्रौं नमः मुखे ह्स्फ्रें नमः कण्ठे ह्स्रौं

स्मार्य्यावर्त्तैकदेशे चित्रभूभागे श्रीविष्णुप्रजापतिक्षेत्रे विक्रमशाके भागीरथ्युत्तरकूले देव
या नाम सम्वत्सरे दक्षिणायने याम गोलाव शिशिरे शरदृतौ कार्त्तिकमासे शुभपक्षे
दे अश्विनी नक्षत्रे योगमुहूर्ते करणान्वितायां शुभनक्षत्रान्वितायां तुलारा
शि स्थिते श्रीमन्सूर्ये मकरे देवगुरौ धनुषि स्थिते रविसुते यथास्थाने स्व
न्ये सुग्रहेषु श्रुतिस्मृतिपुराणोक्त वेदोक्त शुभपुण्यफलप्राप्तिकामः अमु
कगोत्रोऽहं अमुकनाम धेयशर्माहं सकलपापक्षयपूर्वकं आयुरारोग्यार्थं
श्रीविष्णुनारायणप्रीत्यर्थं श्रीमहावीररुद्रदेवतायोपचारपूजापूर्वकं गीते
स्य अमुकवीजमन्त्रेण पञ्चांगस्य केजपनस्य दशांशहवन तर्पणादि वलि
दानसहितं स्वाङ्गीकृत्य हनुमत्प्रीत्यर्थं अहं करिष्ये ॥ अथ विनि
योगः ॐ अस्य श्रीहनुमन्मन्त्रस्य श्रीरामचन्द्र ऋषिः जगती छन्दः हनु

पीठात्मनेनमः इति पीठदानम् करकच्छपिकया पुष्पमेकं गृहीत्वा । अथ प्रा
णप्रतिष्ठा ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं हंसः सोऽहं हनुमतः प्राणा इह प्राणाः
पुनः जीव इह स्थित न स्वचक्षुः श्रोत्र घ्रा या प्राणा इहागत्य सुखं चिरं तिष्ठन्तु
स्वाहा ॐ देवेश भक्ति सुलभ परिवार समन्वित यावत्वां पूजयिष्यामि
तावत्वं सुस्थिरो भव ॥१॥ हनुमान् इह स्थितो भव । किं वहुलेन मनु
ना सर्वं दत्वा कपीश्वरः ॐ हनुमते नमः । स्नानीयं गंध पुष्पं धूपं दीपं नै
वेद्यं पुनराचमनं दद्यात् अथ मंत्रेण धूपः ॐ रामदूताय सीताशोक
निवारणाय भक्तजन क्लेशनिवारणाय नानासुखप्रदाय ज्वालरा
स भूतप्रेतपिशाच डाकिनी शाकिनी चिन्ता क्षयाय भक्तजनवशीकर

नमः शाखौ । हनुमान् देवतायै नमः हृदये । ह्रौं नमः कुक्षौ ह्स्फ्रें नमः । नाभौ ख्फ्रें नमः लिङ्गे ह्सौं नमः जान्वोः ह्स्ख्फ्रें नमः पादयोः ह्स्रौं हनुमते नमः सर्वांगे इति सप्तवारं व्यापकं कुर्यात् अथ ध्यानम् बालार्कद्युतितेजसं त्रिभुवनप्रक्षोभकं सुन्दरं सुग्रीवादि समस्त वानरगणैः संसेव्यपाद सुजम् । नादेनैव समस्त राक्षसगणान् संत्रासयन्तं प्रभुं श्रीमद्रामपदाम्बुजस्मृतिरतं ध्यायामि वातात्मजम् अथ पूजा अष्टदलेषु ॐ विमलायै नमः ॐ उत्कर्षिण्यै नमः ॐ ज्ञानायै नमः ॐ क्रियायै नमः ॐ योगायै नमः ॐ प्रह्व्यै नमः ॐ सत्यायै नमः ॐ ईशानायै नमः ॐ अनुग्रहायै नमः ॐ नमो भगवते हनुमते सर्वभूतात्मने योग

नुम[illegible]ते:

ॐ

रामभक्ताय नमः। महातेजसे नमः। कपिराजाय नमः महाबलाय नमः द्रोणादिहा
रकाय नमः। मेरुपीठकार्चनकारकाय नमः दक्षिणाशाभास्कराय नमः सर्व
विघ्ननिवारकाय नमः जलं स्थापयेत् २ तत्रैव सुग्रीवाय नमः अंगदाय न
मः नीलाय नमः जाम्बवते नमः नलाय नमः सुषेणाय नमः द्विविदा
य नमः मैन्दाय नमः जलं स्थापयेत् ततः पूर्वादिदिक्षु पूजनं ॐ इन्द्राय
4 ॥६॥ नमः ॐ अग्नये नमः ॐ यमाय नमः ॐ नैर्ऋतये नमः ॐ वरुणाय नमः ॥६॥
ॐ वायवे नमः ॐ कुबेराय नमः ॐ ईशानाय नमः ॐ नैर्ऋत्यपश्चिमयो
र्मध्ये ॐ अनन्ताय नमः पूर्वेशानयोर्मध्ये ॐ ब्रह्मणे नमः तत्रैवास्त्र
पूजनम् ॐ वज्राय नमः शक्तये नमः दण्डाय नमः खड्गाय नमः पाशा
य नमः अंकुशाय नमः गदायै नमः त्रिशूलाय नमः ओ[illegible]नमः ॥

[illegible]८

शाय सर्वशत्रुविनाशाय भक्तप्रियाय स्वाहा एवं धूपं दत्वा मंत्रं जपेत् ॥
ॐ हनूमते रुद्राय श्रीरामदूताय सकलविघ्ननिवारणाय स्वाहा ॥ अथ
दीपमंत्रः। रामदूतप्रियो वीर लङ्काशोकनिवारणः। लक्ष्मणप्राणदाता च
दीपं मे प्रतिगृह्यताम्॥ पुनः नैवेद्यं आचमनं ताम्बूलादिकं दत्वा प्रार्थये-
त्॥ यद्दर्शनं कृतं देव पत्रं पुष्पं फलं जलम्॥ तद्गृहाण त्वं कृपया मम कार्यप्रदो
भव ॥१॥ हनुमन् सुखदो भव हनुमन् फलदो भव। यत्नेन हनुमन् सौम्यो भव हनुमन्तं
प्रार्थयामि॥ पुनरनुज्ञां ग्रामा वर्तनं ह्रां हृदयाय नमः। ह्रीं शिरसे
स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुम्। ह्रौं नेत्रत्रयाय वौषट्।
ह्रः अस्त्राय फट्। इत्यग्निकोणादि ईशानान्तं जलं स्पृशेत्॥ अथ पुनः पत्रेषु

त्यादि ततो यथा शक्ति जपं कृत्वा तत्तो जपादौ माला मंत्रः माले माले महामाले सर्वशक्ति
स्वरूपिणि॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव १ ततो जपः ह्रौं ह्स्फ्रें ख्फ्रें
ह्स्रौं ह्स्ख्फ्रें ह्सौं हनुमते नमः ततो देवदक्षिणाकरे समर्पयेत् तत्रमंत्रः ॐ गुह्या
तिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्सुरेश्वर॥१॥ दा
ततः स्तोत्रादि पठित्वा ततो ५२ जपान्ते माला शिरसि अर्पयेत् त्वं माले सर्वदेवानां प्रीति
5 दा शुभदा भव॥ सिद्धिं कुरुष्व मे भद्रे यशोवीर्यं च सर्वदा ततो विसर्जयेत् संह
॥४॥ रमुद्रया ॐ गच्छ गच्छ स्वपं स्थानं स्वस्थानं परमेश्वर॥ यत्र ब्रह्मादयो देवाः॥५॥
नविद्युः स्थानमुत्तमम् इत्थानेति कोहं विलिखय ॐ डक्किडमो क्रै नमः
स्वस्व पुरश्चरणं जपसंख्या १२००० होम गोघृत तिल १२०० तर्पण मार्जन
ब्राह्मण १०२ मार्जनं गन्धोदकेन ११ ब्राह्मण भोजन १ समुकं छिं धिर सिंधिर

कमरश्च्लवेनमः जलंस्पृशोतु ततः मूलं हृदंपादयम् सांगाय सायुधाय सवा
हनाय सपरिवाराय हनुमतेनमः एषोऽर्घः हृदं स्नानीयं हृदं चन्दनं हृदंपुष्पम्
ततः धूपपात्रं फट् इति प्रक्षाल्य मूलमष्ट[illegible] प्रजप्य ॐ वनस्पतिरसोपेतो
गंधाढ्यः सुमनोहरः आघ्रेयः सर्वदेवानां धूपोऽयंप्रतिगृह्यताम् एष
धूप मूलं हनुमतेनमः ततो दीपमादाय फट् इति प्रक्षाल्य रं८ वं८ अमृ
तीकृत्य मूलम्८ प्रजप्य ॐ आज्यनवर्तिसंयुक्तः सर्वततिमिरापहः
वाह्यमभ्यन्तरे ज्योतिर्दीपोऽयं प्रतिगृह्यतां एषदीपः मूलं सांगायेत्यादि
ततो नैवेद्यमादाय फट् इति प्रक्षाल्य रं८ वं८ अमृतीकृत्य मूलं८ प्रजप्य
हृदं नैवेद्यं मूलं सांगायेत्यादि ततआचमनीयं हृदं ताम्बूलं मूलं सांगाये

मारय २ हुं फट् अमुकामुकयोः परस्परविद्वेषणं २ ठो ठ ठ मोहनवशीकरणा

॥६॥ आकर्षणो स्वाहा इति पट्कर्मयाद्दशाक्षरेण योज्यं वशप्रापणे सर्षपैर्होमो विद्वे

षे करवीरजैः कुसुमैरि[illegible] श्मकाष्ठैर्वजीरकैर्मैस्त्रिचैरपि ॥ इति श्रीसु

दर्शनसंहितायां हनुमत्पूजापद्धतिः समाप्ता एवं ध्यात्वा जपेदर्कसहस्रं

जितमानसः दशांशं जुहुयाद्धीमान् पयोदध्याज्यसंयुतान् १ कद

लीबीजपूराम्रफलैर्हुत्वा सहस्रकम् द्वाविंशद्ब्रह्मचारीन् विप्रान्सं ॥६॥

भोजयेदपि ॥२॥